# विवेकानन्दस्वामिपादानां स्मृतिमन्दिरस्य स्थापत्यम्

शुभदीपदासः*

अनु महासमाधि प्रेष्ठबिल्वतरोः अन्तिके अधिसमाधिमञ्चं विवेकानन्दस्वामिपादानां स्मृतिकक्षः विनिर्ममे। प्रथमपर्याये अर्थाभावात् कक्षाद्बहिः परिक्रमणाध्वनि अङ्गसज्जा नैव समाप्तिं गता। पुण्यतोया मन्दाकिनी नित्यं मन्दिरं स्पृशन्ती तस्य क्षयसम्भावनाम् अवर्धयत। परं विंशत्यधिकोनविंशतितमे ईशवीयाब्दे पुनः स्मृतिमन्दिरनिर्माणकार्यं समारभ्यत। तदर्थं च स्वामिविज्ञानानन्दः वेलुडमठं समाययौ। श्रीरामकृष्णमन्दिरस्थापत्यवैशिष्ट्यानि स्वामिपरिकल्पितानि मनसि निधायैव तेन स्वामिनां स्मृतिमन्दिरस्य निर्माणे प्रवृत्तम्। अतः सर्वधर्मसमन्वयभावना अत्रापि मन्दिरे प्रकटिता। स्मृतिमन्दिरम् इदं पश्चिमाभिमुखम्। तस्य पूर्वस्यां पुण्यसलिला गङ्गा, उत्तरस्याम् ऐतिहासिकं देवदारुवृक्षत्रयं, ततः उत्तरस्यां मातृमन्दिरं राखालमहाराजमन्दिरं च, उत्तरपश्चिमदिशि श्रीरामकृष्णमन्दिरम्।

## प्रथमतलम्

गर्भगृहम् एव मन्दिरस्य प्राणभूतम्। उत्तरभारतीयनागररीतिस्थापत्यानुगुणं गर्भगृहं सदैव उन्नतभूमौ भवति, सोपानानि च यथापेक्षितानि निर्मीयन्ते। श्रीरामकृष्णमन्दिरेऽपि तथैव दृश्यते। स्वामिनां स्मृतिमन्दिरे तु एतद्विरुद्धमेव परिलक्ष्यते। अयं च दोषः गुणत्वेन परिणमितः स्वामिविज्ञानान्देन। स्वामिनां

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

गर्भमन्दिरम् (भूमेरपि) अधस्तात् विद्यमानम्। मातृमन्दिरे जगज्जननी सारदा पूर्वास्या तदुन्नतभूमौ राजमाना, स्वामी च पश्चिमास्यः कृपाकाङ्क्षया तामवलोकयति इति अत्र विशेषः। अस्मिन्प्रथमतले स्वामिनां रिलिफ्-मूर्तिसमन्वितं वर्गाकारं गर्भमन्दिरम्। भित्तिपार्श्वे सितप्रस्तरवेदिका- स्वामिनां पाञ्चभौतिकदेहसंस्कारस्थानम्। मन्दिरस्य उपरिभागः अर्धचन्द्राकृतिः। उभयत्र च वातायनद्वयम्। मूलमन्दिरस्य संरक्षणार्थं परितः भित्तयः। अनेन सङ्कीर्णमेकं नाटमन्दिरं परिक्रमणमार्गश्च सृष्टे। प्रथमतलम् एतत् तथा दृष्टिनन्दनं नास्ति।

## द्वितीयतलम्

द्वितीयतले ओङ्कारमन्दिरम्। स्वामिचरणानां चिन्तनम् अत्र मन्दिरे प्रतिविम्बते। अतः अस्य न केवलं मन्दिरत्वं चिन्त्यम्। “हिन्दुधर्मे नैकेषु सम्प्रदायभेदेषु सत्स्वपि ओङ्कारो हि सर्वेषामुपास्यः। अतः सार्वजनीनम् ओङ्कारमन्दिरम् एकं निर्मेयम्” इति तदभिलाषः प्रकृते वास्तवायितः। ओङ्कारः सर्वधर्मसमन्वयप्रतीकस्वरूपः। ओङ्कारे हि जगति विद्यमानानां समेषां धर्माणां समन्वयः शक्यसम्भवः। अतः स्वामिस्मृतिमन्दिरस्य द्वितीयतलमेव ओङ्कारमन्दिरस्य गर्भगृहं सञ्जातम्। मन्दिरस्य पुरतः सोपानानि। ओङ्कारमन्दिरस्य गर्भगृहं स्वामिगर्भगृहसमपरिमाणम्। वेदिकाया उपरि सितपादपीठस्थे सितकलसे प्रस्फुटितं श्वेतशतदलं, तदुपरि ओङ्कारश्च। गृहस्य भित्तौ अष्टौ प्रतिमास्थानानि सन्ति। स्वामिमन्दिरापेक्षया ओङ्कारमन्दिरम् असङ्कीर्णम्। चत्वारि द्वाराणि ओङ्कारादिचिह्नोपेतानि अखिलविश्ववासिनः आह्वयन्ति। ओङ्कारगृहस्य उपरिभागः शून्यः गोलाकारश्च तृतीयस्तरे चूडायां पर्यवस्यति। “विवेकानन्दः घनीभूतभारतवर्षस्वरूपः, तस्य मन्दिरं च भारतवर्षस्य भावसत्तायाः प्रतीकभूतम्” इति भगिनी निवेदिता मन्यते। अतः ओङ्कारमन्दिरोपेतं स्वामिनाम् इदं स्मृतिमन्दिरं विश्वजनीनम् (Universal) अभूत्। अस्य ओङ्कारमन्दिरस्य प्रतिष्ठायां हि चत्वारि कारणानि—

१. स्वामिमन्दिरस्य अल्पकायत्वात् तस्य सौधत्वेन परिणामाय उत्तुङ्गता अपेक्षिता।

२. गर्भगृहस्य उपरिभागे रिक्ते सति स्वामिनां श्रीमूर्तेः उपरि सर्वेषां गमनागमनं स्यात्। तदनभिप्रेतम्।

३. स्वामिनां सर्वजनीनभावस्य वास्तवायनम्।

४. शास्त्रीयनागरशैल्या मन्दिरनिर्माणे अस्य उपयोगः।

## तृतीयतलम्

मन्दिरस्य तृतीयतलं चूडांशभूतमपि मन्दिराकारत्वात् क्षुद्रमन्दिरमिव प्रतिभाति। वस्तुतस्तु ओङ्कारमन्दिरस्य उपरिभागः प्यारापेटभित्त्या समावृतः, अस्य आशाचतुष्टये चूडाचतुष्टयम्। एतद्विहाय क्षुद्रचूडाचतुष्टयं क्षुद्राकृति-प्यारापेटभित्तिश्च मध्यवर्तिनीम् अन्तःशून्यां मन्दिराकृतिं समावृत्य वर्तते। सर्वदिक्षु वायुगमनागमनविवराणि सन्ति। दक्षिणेश्वरभवतारिणीमन्दिरमिव सर्वतः विद्यमानं वृत्तखण्डाकृतित्रयं मन्दिरस्य शोभां वर्धयति। मध्ये च बृहदाकारायां प्रधानचूडायाम् आमलक-कलस-प्रस्फुटितकमलानि, तदुपरि नयनसमाकर्षकं धातुजत्रिशूलं स्वामिनां शिवस्वरूपं द्योतयति।

अत्र मन्दिरे वङ्गप्रदेशे समुपलभ्यमानानां चाला-दालान-रत्न-आख्यानां त्रिविधमन्दिरशैलीनां समावेशः समुपलभ्यते। ओङ्कारमन्दिरस्य समतलोपरिभागेन दालानमन्दिरत्वं, मध्ये मन्दिराकृतिशिखरे चालाकृत्या चालामन्दिरत्वं, पर्यायत्रये चूडात्रयेण नवरत्नमन्दिरत्वं च अस्य स्फुटीभवति। एवं विवेकानन्दस्वामिपादानाम् इदं स्मृतिमन्दिरम् तस्य समन्वयचिन्तनस्यैव निदर्शनभूतम् इति निःसङ्कोचं वक्तुं शक्यम् इति शिवम्।